# सूर्याष्टकम्

आदिदॆव नमस्तुभ्यं प्रसीद मभास्कर
दिवाकर नमस्तुभ्यं प्रभाकर नमॊस्तुतॆ

सप्ताश्व रध मारूढं प्रचण्डं कश्यपात्मजं
श्वॆत पद्मधरं दॆवं तं सूर्यं प्रणमाम्यहं

लॊहितं रधमारूढं सर्व लॊक पितामहं
महापाप हरं दॆवं तं सूर्यं प्रणमाम्यहं

त्रैगुण्यं च महाशूरं ब्रह्म विष्णु महॆश्वरं
महा पाप हरं दॆवं तं सूर्यं प्रणमाम्यहं

बृंहितं तॆजसां पुञ्जं वायु माकाश मॆवच
प्रभुञ्च सर्व लॊकानां तं सूर्यं प्रणमाम्यहं

बन्धूक पुष्प सङ्काशं हार कुण्डल भूषितं
ऎक चक्रधरं दॆवं तं सूर्यं प्रणमाम्यहं

विश्वॆशं विश्व कर्तारं महा तॊजः प्रदीपनं
महा पाप हरं दॆवं तं सूर्यं प्रणमाम्यहं

तं सूर्यं जगतां नाधं ज्नान विज्नान मॊक्षदं

महा पाप हरं दोवं तं सूर्यं प्रणमाम्यहं

सूर्याष्टकं पठोन्नित्यं ग्रहपीडा प्रणाशनं
अपुत्रो लभतो पुत्रं दरिद्रो धनवान् भवोत्

आमिषं मधुपानं च यः करोति रवोर्धिनो
सप्त जन्म भवोद्रोगी जन्म कर्म दरिद्रता

स्त्री तैल मधु मांसानि हस्त्यजोत्तु रवोर्धिनो
न व्याधि शोक दारिद्र्यं सूर्य लोकं स गच्छति

इति श्री शिवप्रोक्तं श्री सूर्याष्टकं सम्पूर्णं